विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग दशम् विषय संस्कृत विषयशिक्षक श्यामउदय सिंह

ता: 19-08-2021 (एन.सी.ई.आर. टी. पर आधारित )

पाठ: द्वितीय: पाठनाम बुद्धिर्बलवती सदा (पुनरावृत्ति)

**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद-"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

I. **एकपदेन उत्तरत-**
   i. राजसिंहः कुत्र वसतिस्म?
   ii. राजसिंह कः आसीत्?

II. **पूर्णवाक्येन उत्तरत-**
   i. सा पुत्रौ चपेटया प्रहृत्य किम् जगाद?

III. **भाषिककार्यम्-**
   i. 'जगाद् इति क्रियापदस्य कर्तृपदं किम्?
      (क) सा
      (ख) अगच्छन्तम्
      (ग) चपेटया
      (घ) तावत्
   ii. 'अयम्' पदं कस्मै प्रयुक्तम्?
      (क) व्याघ्राय
      (ख) शृगालाय
      (ग) राजपुत्राय
      (घ) कलह
   iii. 'भार्या' इतिपदस्य विशेषणपदं किम्?
      (क) तस्य
      (ख) चालिता

(ग) बुद्धिमती

(घ) चपेटया

**Answer**

1.

I. (i) देउल

(ii) राजपुत्रः

II. (i) सा पुत्रौ चपेटया प्रहृत्य जगाद-कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयम् एकः तावत् विभज्य भुज्यताम्/पश्चाद् अन्यो द्वितीयः कश्चित् लक्षयते।

III. (i) (क) सौ

(ii) (क) व्याघ्राय

(iii) (ग) बुद्धिमती